# श्रीपशुपत्यष्टकम् स्तोत्रम् –

# PASHUPATI ASHTAKAM STOTRAM

पशुपतिं द्युतिं धरणीपतिं भुजगलोकपतिं च सतीपतिम्।

प्रणतभक्तजनार्तिहरं परं भजत रे मनुजा गिरिजापतिम्।।1।।

न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम्।

अवति कोऽपि न कालवशं गतं भजत रे मनुजा गिरिजापतिम्।।2।।

मुरजडिण्डिमवाद्यविलक्षणं
मधुरपंचमनादविशारदम्।

प्रमथभूतगणैरपि सेवितं भजत रे मनुजा
गिरिजापतिम्।।3।।

शरणदं सुखदं शरणान्वितं शिव
शिवेति शिवेति नतं नृणाम्।

अभयदं करुणावरुणालयं भजत रे मनुजा
गिरिजापतिम्।।4।।

नरशिरोरचितं मणिकुण्डलं भुजगहारमुदं
वृषभध्वजम्।

चितिरजोधवलीकृतविग्रहं भजत रे मनुजा
गिरिजापतिम्।।5।।

मखविनाशकरं शशिशेखरं सततमध्वरभाजि
फलप्रदम्।

प्रलयदग्धसुरासुरमानवं
भजत रे मनुजा गिरिजापतिम्।।6।।

मदमपास्य चिरं हृदि संस्थितं
मरणजन्मजराभयपीडिम्।

जगदुदीक्ष्य समीपभयाकुलं भजत रे मनुजा
गिरिजापतिम्।।7।।

हरिविरंचिसुराधिपपूजितं
यमजनेशधनेशनमस्कृतम।

त्रिनयनं भुवनत्रितयाधिपं भजत रे मनुजा
गिरिजापतिम्।।8।।

पशुपतेरिदमष्टकमद्भुतं विरचितं
पृथिवीपतिसूरिणा।

पठति संश्रृणुते मनुजः सदा शिवपुरीं वसते
लभते मुदम।।9।।

इति श्रीपृथिवीपतिसूरिविरचितं
श्रीपशुपत्यष्टकं सम्पूर्णम।